२१
४२
८५

कय्यटभाष्यटीका

भाष्यप्रदीपोद्योते द्वितीयाध्यायः

११८ पत्राणि

३२

नं. ३९६

[illegible]

कै॰ टि॰ श्रीगणेशाय नमः समर्थः पदविधिरिति कोपमिति भाष्यस्य न स्वरूपप्रश्ने तात्पर्यं तस्य श्रोत्रेण निश्चितत्वात् एतत्तो निप्रापमाहअर्थेति ॥
१ कोपमित्यस्य किमर्थं कोपमित्यर्थः शब्दार्थयोरभेदात् इति भावः किंभावेति करणाधिकरणसाधनत्वस्य अनन्वितत्वात् प्रयोजना
भावाच्च नोक्तिरिति विततः विधीयमानत्वादिति वस्तुसादिविधाविति शेषः तत्रत्वेतिकर्मसाधने इदं स थेः अर्थभेदाच्छब्दभेद इति मते प्रस
भिज्ञानुपपत्तिः तद्भेदेऽपि शब्दैक्येतु कः शब्दं समनुपपन्नमत आह तत्रेति श्रोत्रादिकेति इगुपधात्किदिति नेनेति भावः स्वरवेति
बहुलग्रहणादौणादिकस्यापि कर्मणि संभव इति भावः प्रयोगदर्शनमिति त्वे स्वर्येणाव्यध्यायीपाठादिह वेदे लोके चेति शे
षः एतस्य वेति तथा सति पदकर्मके विधाने दृष्टपर्यायो समासाद्य संग्रहः स्यात् स समासादेश विधौ वा तिप्रसंगः स्यादिति
भावः इह सूत्रे इतरा इति प्रकरणपर्यालोचनयेति भावः समासपदं इति मात्रोपलक्षणं समुदायो वेति सख्यवयवभूतपदानां
कार्ये समूहस्यावयवगतिरिक्तत्वाच्चापि स्वीकारादिति भावः विभक्त्यंतस्य पदत्वात् विभक्तिविधानस्य कथं पदोद्देश्यकविधि
त्वमित्याशंक्याह विभक्तीति एव इहीति विहितानां नियमस्य विधिना यस्या प्रतरविभक्त्यंतानां निहत्तिरूपस्याश्रयणेन सा निवृत्तिः
:पदोद्देश्यके स्यैः केचित्तु पदोद्देश्यकः पदत्वसंपादको वा सर्वोऽपि पदसंबंधित्वात् स द्विविधिरेवेति वदंति तन्न किं विधीयत इति एमः
प्रश्ने विभक्तिविधानमित्युत्तरमयुक्तं विधानस्य विधानकर्मत्वाभावादत आह तत्र विभक्त्येति एवं च सामान्यविशेषभावेनान्वयं १

तिभावः क्रियाविशेषणत्वाच्चकर्मत्वं। रूपद्वयमिति यद्यपि संज्ञात्वमपि तत्र तथापि एतद्रूपयातपा शास्त्रेव्यवहाराभावात्तन्नोक्तं
अन्येनेति। पूर्वपक्षिणा सिद्धांतिना चेत्यर्थः आद्येनेति पाठे किं पुनरिति संदेहकर्त्रेत्यर्थः अन्यथा त्वत्र अधिकारपरिभाषयोर्वि
शेषाज्ञाने फलाख्यानं तस्यानिर्देशार्थं इत्येतत्। स्वरूपयोगे योगेपादानेति। स्वरितत्वमयुक्ताधिकारेणोज्जरत्रेतज्जस्यदोयस्थि
तिः अधिकारांतरं ह व्याख्यानात्प्रानिवृत्तिश्च परिभाषायाः लिंगवत्तिसर्वत्रतेषां सर्वेषामत्रोपस्थिमापरिभाषायावात तत्र त
त्रोपस्थितस्स्वार्थोपस्थितिद्वाराव्याप्तिरिति भावः इदं च षष्ठीस्थाने इति सूत्रे निरूपितं तदुक्तमेकदेशास्त्र भवनेयातिदीप
तोपरितो व्याप्ततो भाषापरिभाषा प्रवर्तते पदेशांतरे स्थिति षष्ठीस्थाने इति सूत्रे आद्यनिपात एकाजनाङिति सूत्रे चांसंतत्र च पारार्थ्य
सामान्यादतिदेशसंज्ञयोः परिभाषात्वेन व्यवहार इति बोध्यं स्वरितगुणयुक्तमित्यस्य स्वच्छंदाद्धात्वर्थे णिचि मत्तो लुकिटिलोपाभा
वेप्यगत्यत्र परिभाषयाह्रस्वभावे आद्गुणो रूपमिति भावः यद्यपि अत्र अजंतस्वरशाह्वात णिचि इदं रूपं प्राप्नोतीति भाष्ये सर्वमित्यस्य
लिंगवत्सर्वशास्त्रमित्यर्थः तानि सर्वाणि पदविधिशब्दोपादानेन सामान्यतः पदविधित्वेनाये स्यान्न पेत्यर्थः द्वयोर्भावो द्वितेति
कोटिद्वये समसेव संशयोदयात द्वित्वं भवः संदेह इति भावः द्विविषयनिश्चयस्यापि द्वित्वमवलादाह अथवेति विरुद्धत्वाभिन्ना
धारवर्त्तिनामकारद्वयेनयुक्तमित्यन्वयः परस्परविरुद्धधर्मद्वयवद्वस्तुद्वयमित्यर्थः अनेकार्थेष्वेकार्थत्वमेकार्थीभाव इति

के॰ टी॰ शब्दशक्तिमनुसृत्य जहत्स्वार्थाजहत्स्वार्थयोस्तं दर्शयिष्यन्नादावजहत्स्वार्थायां तद्दर्शयति॰ यत्र पदानीति॰ उपसर्जनपदानीत्यर्थः
२ तदेव ध्वनयन्नाह उपसर्जनभूतस्वार्थानीति इतरविशेषणभूतस्वार्थोपस्थापकानीत्यर्थः न तु त्यक्तस्वार्थोपस्थापकानीति ता
त्पर्यं॰ एवं च तत्पुरुषादौ एकपदं तादृशं बहुव्रीहौ द्वे च पदद्वयमपीति बोध्यं जहत्स्वार्थायामाह निहतस्वार्थानि वेति॰ उभयत्रा
पि हेतुः प्रधानार्थोपादानादिति आद्ये प्रधानार्थेन स्वोपस्थितिकाले एव उपसर्जनपदार्थस्य विशेषणतयोपादानादित्य
र्थः अन्त्ये प्रधानेन पदेन तदर्थस्याप्युपादानादित्यर्थः बहुव्रीहौ तु प्रधानपदं समुदाय इति बोध्यं एवं द्वन्द्वेपि प्रधानपदं समुदा
यस्तदर्थेन साहित्येन स्वविशेषणतया स्वघटकार्थस्योपादानादुपसर्जनभूतस्वार्थानि यद्वा विशेष्यसाहित्योपस्थापकत्वात्प्र
धानेन समुदायेनैव स्वघटकार्थस्याप्युपादानान्निहतस्वार्थानि वेति तत्राप्ययमेकार्थीभावः समाहारेतरेतरयोगयोरुभ
योरपि साहित्यं विशेष्यं आद्ये तु भूतावयवभेदं मेलयेद्भूतावयवभेदमित्येव तयोर्भेद इति बोध्यं स्वार्थानीति सन्निहित
त्वान्निहतस्वार्थानि इत्येतत्स्पष्टान्वयि॰ आद्ये आहत्य स्वार्थानि इति अर्थान्तरान्वितस्वार्थाभिधायीनीत्यर्थः । प्रत्येकशक्तिस
हकृतसमुदायशक्त्या विशिष्टार्थप्रतिपादकानीति भावः पदानीति बहुवचनं तु बहुव्रीह्याद्यभिप्रायेण । स एकार्थीभाव इति॰ रामः
आद्ये एकीभूतार्था निमिलितार्थानीत्यर्थः तत्र मिलनस्येतरसाकांक्षत्वात्तद्द्वयोरपि समर्थत्वं तत्पुरुषादौ अत्र से पदद्वयार्थयोरेकप २

दार्थत्वप्राप्तिरित्यर्थः परस्परेति। विशब्दस्य क्रियापदमतीहारं सन्निधानादिति भावः। तत्रैवैकार्थीभावस्येति तदुक्तं तत्र पारागामध्ये तत्रैवेमर्थः
सापेक्षासहिताधिकारत्वेऽधिकारत्वप्रयुक्तदोषमाह भाष्ये स्मेत्यत्रखल्वपीति। एकार्थीभावसहिताधिकारत्वे अधिकारस्य समर्थपुनःकोदे
षस्कमध्ये पादद्वये निवृत्त्यात तीपाध्यापाद्यावसंबंधो बोध्यः। एतेनाधिकारत्वसहितोभयविधसामर्थ्ये [illegible] ती पाध्या
[illegible] एतेनाधिकारत्वसहितोभयविधसामर्थ्योभयपरतापक्षोऽपि निरस्तः। उभयविधेति अधिकारत्वपरिभाषात्वे
चेत्यर्थः। भवतां वेरूपत्वलक्षणाः। ननु पराङ्गवद्भावविधानासंग्रहो दोषो तत्राह तत्रेति। व्यपेक्षाविनाभावित्वादिति व्यपेक्षायामपि तत्त्वा
दित्यर्थः। एवं चैतदुपस्थितिं विनापि तत्र न दोषः। क्रियाकारकयोरेकार्थीभावासंभवश्चेति भावः। अत्र क्रियाकारकयोरित्यत्र पा
मक्तस्यैथ विभक्त्यर्थयोः सर्वथा व्यपेक्षाभावो दर्शितः। इदानीमेकार्थीभावसहितपरिभाषापक्षे उक्तं प्रकर्षयोगमुपपादयति
सुप्धातुप्रभृतयइति। एतेनाधिकारत्वेनैतदसंग्रहो दोष इति ध्वनितं अत्रमत्र सुक्तग्रहणमिति। तथा च तदेशात्रैकार्थीभावसामञ्जा पर्य
नानत्वाह एवमपि क्वचिदिति। लिंगादिरिति। एतल्लिंगमलुकातकुत्सितरतिसूत्रभाष्योक्तन्यायादित्यर्थः। कृतसंधिकार्यत्वार्थ
कमपि तत्र तदर्थ्यसोऽस्ति तावेतरगत्वैनेव पूर्वं संधिकार्यप्रवृत्ते विप्रतिषेधसूत्रे भाष्ये उक्तत्वात् पचकेति ददर्शिवंसंततस्य संक्षेपि
तदर्थघातकत्वयाविभक्तेरावश्यकत्वात्। भाष्ये पूर्वपक्ष्याशयस्त्वेवं पदविधिशब्देन पदोद्देश्यकविधिग्रहणं। एवं च साक्षात्पदोद्देश्य

के॰ टि॰ केसमासनञ्क्रिताद्वेवस्मान्वत्तत्रश्चात्रहिपः साक्षादुद्देश्यो धातुर्नेसपदे॰ किंचधातोरएककर्मचोपपदसंज्ञमितिसूत्रार्थात्संनियोगशि
३ ष्टन्यायेनतत्रसतिप्रत्ययइतिनतदुद्देश्यकः प्रत्ययविधिः उपपदसंज्ञायास्तदुद्देश्यकत्वेपितत्रैकार्थीभावयोग्यद्वितीयाभावइति
देवदत्तस्यकुंभंकरोतीत्यादौप्रत्ययेनिवृत्तयेसमर्थग्रहणस्यावश्यकत्वात्किमुच्यतेगम्यतेतत्रसामर्थ्यमित्यतआहपदेति॰
प्रयुक्तानामिदमन्वाख्यानंलोकप्रयुक्तस्साधोरेवनिवर्तकमितिनदोषइतिभावः भाष्येऽसन्नेहीतिहित्वर्थेयथासमोसाद
यइति॰ अस्याख्यापितहेत्वर्थंस्यात्॰ प्रयुक्तायुक्तत्वविवेकरहितानामर्थेइहेवतत्रापिकर्तव्यमित्यर्थः॰ महत्याः संज्ञाया
इति॰ संज्ञासूत्रस्यातत्रग्रहणस्यवैसर्पिवोध्यं॰ यथाकथंचिदुपपदसंबंधिविधेस्तत्रग्रहणमितिभावः॰ नविधीयतइतिएवंच
नत्तस्यप्रधानत्वमितिभावः सामर्थ्योपस्थाने समर्थपदोपस्थानेयस्यदेवदत्तकष्टमिति केष्टपदार्थमाहश्रितइतिनन्वसम
पिसमर्थग्रहणेएकार्थीभावाभावे नर्थकत्वेनप्रातिपदिकसंज्ञा॰ प्रहेतो फलाभावात्समासोपिनस्यात्॰ सूत्रेतुएकार्थीभा
ववतिचरितार्थमित्यतआह अस्तिसत्रेइतिनन्वेकार्थीभावविषयेएवसमासःशिष्टैःप्रयुज्यतेइतिकथमेतदतआहवच
नादितिलक्षणमात्रशरणाप्रतिसूत्रारंभइतिभावः ननुफलाभावोतआहवचनादितिफलंतुछिन्तिवचनादित्यर्थः वाक्यसंबं राम:
धिनेमितिविष्णुमित्रादयोवाक्यसंबंधिनः भाष्येउपादानविकल्पइतिउपादानेनकृतोविकल्पइत्यर्थः तिष्ठत्वमिति॰ तिष्ठत्वंशंकु ३

लपानप्रयोजनं मृशालेन कृतः खंडो धावतीत्यर्थः शंकुलयेति सहयोगे तृतीये लपिकश्चित् हे विशाखमित्र त्वं शंकुलया किं करिष्यसि उपले
न पाषाणेन कृतः खंड इति द्वितीयार्थः ननु खंडस्य प्रकृतत्वात् तृतीयोत्तार्थे कृतत्वेना सीसनन्नाह तृतीयांतार्थेति तद्धेतुने नतृतीयांत
मात्रं परामृश्यते तच्चात्र खंडनस्य करणा साध्यत्वावश्यंभावाद्विश्यमस्येवेति भावः प्रसामर्तिनोश्रीयत इसभिप्राय केम्प
इत्यस्य मानेषीरिति क्रियाप्रसपादनं त्वेपजदत्ताद्देवदत्तो वश्यर स्यपरत्विमार्गे संभावितमपि हृककभयेसत्कानदूरस्परणार्थं त्वं गच्छे
ति वाक्यार्थः अस्येवात्रेति सर्वेषां कारककारकाणां साक्षात्सामं परयावाक्रियायामन्वयादिति भावः भाष्ये इह कस्मान्नेति समास इति
शेषः महाकष्टश्रितइतीति पदे वंवाक्यंतदा समासेन महाकष्टश्रित इति भवतीत्यर्थः तदानभवितव्यमिति समासेनेति शेषः ननु पदिसा
मर्थ्यमस्ति अस्तु समासः को दोष इत्यत आह पथवेति तदा महत्कष्टेति महदिति एवं च यदं महाकष्टश्रित इति + परे तु महानदे
वदत्तः प्रियो यस्येति त्रिपदबहुव्रीहौ महादेवदत्तप्रिय इत्यस्याभावायमहद्देवदत्तप्रिय इत्यस्यासिद्ध्ये त्रिपदसमासे सिंवांतरपदयो
:सन्महदिति समासाप्रवृत्तिर्बहुलग्रहणादिति महत्कष्टश्रित इत्येवैकपद्येनैकस्वरः स्यात्तच्च नेष्यत इति भाष्याभिप्रायः विशेष
णां विशेष्येणेत्यस्य त्रिपदे समासे वांतरपदयोर्महत्त्वं सूत्रशेषे वदतां तत्त्वं पंचमतानां पूर्वनिपातनियमार्थो नो च तत्र प्रवृत्तिरुक्त
प्रायेवेत्याहुः + एतत्क्रियहके समासे परत्वात् हीने द्वितीयेत्यनेन पूर्वपदप्रकृतिस्वरः एकाराकारः उदात्तः त्रिपदसमासे वांतरतत्पुरुषे

कै·टी· तस्य समासांतोदात्तत्वेपि स एवेत्यर्थः समासस्येत्यनेनेति अवांतरतत्पुरुषनिमित्तकेनेत्यर्थः थाथादिस्वर इति न्क प्रसपाकारछदात्त
४ इत्यर्थः तेनांतोदात्तविधानात् यथेति· तत्र हि त्रिपदे बहुव्रीहौ अवांतरतत्पुरुषतद्धितार्थेत्यनेन जाते सति शिष्टत्वाद्वांतरतत्पुरुषप्रयुक्तः
स्वर इत्यर्थः परस्परं संबंधाभावादिति इष्टयोगे कार्थीभावादित्यर्थः पूर्यमानत्वमिति· कष्टेन महता स्यान्वयाभावादिति भावः विशेष
ताविशेष्यत्वे चेति· अन्येनैकार्थीभावादेव परस्परं तत्वाभाव इत्यर्थः समासेन स्यादिति अवांतरतत्पुरुषेण स्यादित्यर्थः स्वरश्च समस
स्येति सोवरीरा स प्रमीनातदंतस्य प्रमीला त्वं हीनवाविर्न्को तोत्तरयदंतस्य समासस्य संबंधि द्वितीयांतं पूर्वपदं प्रकृत्स्वेसर्था
दिति भावः अत्रात्तुविवीजेंतुत्र यात्याम एकार्थीभावे द्वयोरपि सोऽस्येव· एकयोगे कार्थीभावाभावेपि न क्षतिरिति समासे इति अस्य थेकप
दस्य समासाभावेन एकवचननिर्देशोऽसंगतः स्यादिति भावः तत्फलं दर्शयति पदद्वयात्मकस्येति सुविसर्गेनेन सुबंतसमुदायपरिग्रह
तो हेतुमाह संख्यापा इति अनियत· संख्यावच्छिन्नस्य संज्ञितेऽव्यवस्थापत्तेः तद्विशेषाकांक्षाया सुयाजसंरक्ष्ये वा विवक्षितत्वमाशयेन
दृष्टांतमाह यथा पशुनेति आकृतौ प्रवर्तमानस्य शास्त्रस्यापि तदाश्रयबहुव्यक्तिषु प्रवृत्तिर्न दृष्टेत्याशंक्याह यथा वा
स्तादिति एकैकस्यामिलितस्यामेवेत्यर्थः प्रसपाभिधानेति त्रानव्यवहारेसर्थः तथा सुबंतसमुदायस्येति· प्रसयपरिग्रहणायरिमा रामः
षपातस्या सुबंततत्वात् सुबंतसमुदायस्य विवक्षिते कत्वकसुप्पदेन वक्तुमशक्यत्वादिति भावः चिकीर्षत्वे विधेयत्वे संचिस्कीर्षस्य ४

स्य पाठः भूषणाय चार्थो भावान्सुरो प्रक्तिः समोनय योगाद्वेति गोध्वंगुणात्वाच्च प्रातिपदिकस्येति प्रधानगता संख्या विवक्ष्यते इति यं
या स्तु अर्थप्राधान्यमादाय वोध्याः आधारगताया इति जासाधारद्रव्यगता संख्या विवक्ष्यते इत्यर्थः नन्वेवं ब्राह्मणो न हंतव्य
इत्यत्रापि जातिसाश्रयसंख्याया विवक्षास्यात् तस्यापि गुणत्वात् अत आह ब्राह्मणसमुदायस्येति शास्त्रार्थोतिक्रांत एवेति न्यायेनैवं शा
स्त्रार्थे ज्ञातेकस्यातिक्रम इति चि सं परे तु सुप्सुपेति वर्जते इति भाष्यस्याकृतिस्तु प्रत्येकं समाप्यत इति वक्ष्यमाणा आशयः इतरस्तु ए
कत्वविवक्षये कसुवंतस्यैक सुवंतेन समास इत्येकमिति मत्वाशंकते नन्वचमो इति आहत्ता विति प्रक्तिजिनिमित्ताश्रय सर्वव्यक्ता विस
र्थः अन्यथा व्यक्तिवादेऽपि विनिगमनाविरहाद्व्यासामान्येन सर्वत्र कार्यप्रवृत्त्येन दुक्तिरसंगता स्यादेवं चैकत्वविवक्षाकर्तुमश
क्येति भावः सिद्धांती स्वाशयं प्रकाशयति आकृतिस्त्विति शब्दप्रवृत्तिनिमित्तं त्वित्यर्थः तदेवाह यावत्स्येत समाप्यते प्रातिपदिकादि
तीति एतस्य दप्रवृत्तिनिमित्ते प्रातिपदिकत्वादी इत्यर्थः द्वयोश्चेति पदद्वयप्रवृत्तिनिमित्ते प्रत्येकं द्वयोरित्यर्थः अयं भावः यथा स्वांग
त्वजनपदत्वादेः प्रत्येकं समाप्त्या स्वांगसमुदाय उत जनपदसमुदायपोर्न स्वांगजनपदग्रहणेन ग्रहणात्तथा प्रकृतेऽपि न च
स्वांगादिस्यादाव व्येकत्वविवक्षया न दर्थलाभः तत्र प्रत्येकत्वस्य स्ववाचकप्रत्ययप्रकृत्यर्थ स्वांगवाचकशब्दान्वितत्वेऽपि स्वां
गान्वितत्वेनैकस्वांगवाचकादिसर्थो लाभात् एको यः स्वांगवाचकः शब्दस्तेनावत एव ततो लाभात् एवं बोद्धेश्यगतासंख्याः

कै टी
५

विवक्षितत्वेनेति मीमांसकसिद्धान्तविरोधोपि॥ किंच प्रातिपदिकसमुदायात्तद्धितशंकायां तत्समाधानपरे मतुप्सूत्रस्थे भाष्ये
नकेपरोक्तः प्रकारो भाष्यः तत्र प्रातिपदिकादिमत्त्वसमस्तत्वेन समासे संख्यामात्रभाने नैकत्वस्याभानात्तद्रूपमारा
विमुक्तत्वस्यैकत्वं तु समाहारान्वयीति बोध्यं न च तत्पर्यायस्याधिकरणैकत्वे कैः समासादिवारणार्थं साध्वी प्योदगित्यादेः स्त्रीप्र
त्ययांतसमुदायाद्दापत्तेस्तथापि सत्वात्तथा च तत्र बहुवचनसत्वेप्येककत्वस्त्रीत्वमपांतादेव प्रसपस्तथा मेत्रायीसाद्रुः
प्रधानार्थाभिधायिनेति प्रधानार्थविशेषणीभूतस्वार्थोपस्थापकेनेत्यर्थः प्राधान्यं स्वार्थमात्रोपस्थापकत्वं क
थमेकार्थीभावश्चेति कथमन्यविशेषणत्वेनेवोपस्थितिरित्यर्थः इतरविशेषणत्वेनोपस्थितस्य स्वविशेषणसोत्रा
कांक्षाभाव इति भावः प्रधानस्य सापेक्षत्वेपि वृत्तावुपपत्तिमाह प्राधान्यादेवेति नन्वेवं राजपुरुषो भार्यायाश्चेत्यपि
स्यादत आह सामान्येत्यादि तु यत्र विशेषणविजातीयविशेषणयोगः प्रधानस्य भवतीति ज्ञाप्यत इति भावः यद्य
पि समासे विशिष्ट एवान्वय इति प्रधानस्य न सापेक्षत्वं तथापि दर्शनीयत्वाद्यन्वये पुरुषत्वमेव विशेष्यतावच्छेदकं
न राजसंबंधो यीत्याशयेन तत्र योक्तिरिति बोध्यं भाष्ये सुधर्गुरुकुलमिति गुरुसंबंधविशिष्टं कुलं संक्रम प्रेक्ष्यातेन तु तद्व रामः
यवो गुणीस्यार्थः तदाह गुरुकुलादिनेति नन्वेवं गुणेवद्वत संबंधित्वेन लभ्येतेत्यत आह सामर्थ्यादवयवमपीति येषामर्थानां गु ५

णानां तत्संबंधात्सामर्थ्यमित्यर्थः। किमः षष्ठ्यंतात्सापेक्षत्वमुपपादयति केषां शालीनामिति। न तु शालीनां कीदृश ओदन इत्यर्थ इति भा
वः। कलमाः श्यामशालयः। आपरीयाणां मध्ये स्वकाढकमित्यर्थे नित्याह आपरीयाणां मज्ञानामिति उक्तार्थे उपपत्तिमाह
नेकत्वादिति। एकत्वे पितृस्याहतद्रव्यवानां वेति सामीप्यादेरपीति। सामीप्याद्नि निरूपितसंबंधस्यापीत्यर्थः। अत्र यद्वा स्वकसंबंध
स्यैवात्र भानमिति तन्नियामकाभावादिति भावः। भाष्ये नैषा समुदायापेक्षेति। एवं चाप्रधानस्यापि सापेक्षत्वे हि निदर्शनात्सा
पेक्षमसमर्थमिति वक्तुमशक्यमिति भावः। गमकत्वाद्वृत्तिरिति वक्ष्यमाणाशयमाह संबंधिशब्दत्वाच्चेति। नित्यसापेक्ष
विषये आकांक्षाया अशांतत्वादुक्तन्यायविषयाभावान्न सामर्थ्यमिति भावः। प्रयुज्यत इति समस्तत्वेनेत्यर्थः। स्वार्थवृत्तिः। स्वा
र्थे इव स्वार्थे वर्तमानस्वार्थे शब्दो भावप्रधानः। स्वार्थमात्रोपस्थापकत्वाव्यवस्थितादर्शायामिव इहाप्यपीत्यर्थः। किमोदनद्रव्यसादपेक्षत्वमाम
र्थेऽपि भाष्यकारप्रयोगादेव साधव इति बोध्यं। सापेक्षमसमर्थमित्यस्यापवादनिकत्वेऽपह्नवं गात तदमाह भाष्येऽन्यत्र स्वत्वपीति अम
यापाकेपरोक्तन्यायस्य एकार्थीभावविषयत्वात्तदसुसोऽसत्त्वव्यपेक्षा हृष सामर्थ्यमेवयहादसंगतिः। स्पष्टेषु तत्र धनपत्वा
हवावनिकेहीति। सएवेति। मदीपं वो वधेदुष्पारिहामित्यादेरिति भावः। भाष्यकारोऽन्यायं दर्शयति अगमकत्वादित्यादिना क्रियाविशे
षणां वेति महद्वाम वर्तितथाकरोतीत्यर्थ इति भावः। नकष्ट विशेषणानामिति तस्य पदार्थैकदेशत्वादिति भावः। नचैवं कष्टंश्रितस्य

कै॰टि॰ स्यापि विग्रहत्वेन स्यात् तत्समाससमानाकारायाः एवोपस्थितेः एतेन वृत्तिविग्रहयोः समानविषयताकत्वं सूचितं विशेषणास
६ मभिव्याहारे तु तदन्वयायकष्टादेः विशेषणानाक्रान्तविशेष्यतयोपस्थितिरावश्यकीति तयोः सामानार्थ्यं त्वभंगः इदमेव
पदार्थः पदार्थेनेति सूत्रमतेर्मूलमिति दिक् भाष्ये एतस्माद्धेतोः अत्र महत्सादि अगमकत्वादित्येन समाधेः सापेक्षमसमर्थमि
त्यादिक्रमः ननु संभाविताशब्दस्य साधुत्वनिर्वाहकत्वपेतद्वाचरिकं स्मरं इत्यर्थः तत्र धनपन्नाह यत्र गमकत्वमसादिना एतदेवाभिप्रेत
माव छे लोके इत्यादिना अगमकत्वादेव तदर्थे शिष्टलोके अप्रयुक्तत्वात् समासो न भवतीति भावः एवं च गमकत्वादेव किमोदनः शा
लीनामित्यादेरुपपत्तिः कैयटाद्युक्तसंबंधिशब्दत्वादियुक्त्यादेव तस्य गुरुकुलमित्यादेः साधुत्वेउपपादितेपि किमोदनः इत्या
देः साधुत्वं नोपपादितं स्यादतो भाष्योक्तमेव साधुगमकत्वेन निर्वाहितमिति शंकायां तत्र आह गमकत्वाभिमत्वाइति तत्र हेतुर्लोके
प्रयोगः अतो सौ गमकत्वेनेष्टः इत्यर्थः परं त्वसाधुरिति भावः असमर्थत्वमुपपादयति किं चिदकुर्वाणामिति न सूर्यस्य यासज्ज
येति सूर्यपदार्थघटकधात्वर्थेन नान्वयाभावात् सामर्थ्यमित्यपि बोध्यं नियमार्थं न विष्यतीति एवं चाकिंचित्कुर्वाणामित्यादि
पः प्रागुक्तान्त साधव इति भावः असूर्यंपश्यादीनां प्रागुक्तानां बहूनां साधुत्वस्येष्टत्वादेकवचनमनुपपन्नमत आह अभेदमिति ए राम:
तस्यैवेति भाष्यस्य प्रागुक्तस्यैव स्यैर्य इति भावः क्रियायामुभयोरिति इदं चिंत्यं ततः सर्वोप्यनिकयेत्यादेः समासापत्तेः असाम ६

र्थेपि ज्ञापकात् क्वचित्समासः स एव भाष्याद्याभेनास्योपयोगाभावाच्च प्रातिपदिकसंज्ञाप्यसमर्थे न लाटयोरिति अनपुंसकस्येति ज्ञापका
दिति भाष्याशयः अनुधेति सर्वत्रागमकत्वागमकत्वेन स्तोकं च सुब्बुक्ते दर्त्तेयेरिति भावः कृतेपि क्वचित्सरं परोपदेशागम्यागमकत्वा
दिनैव सर्वप्रयोगनिर्वाह इति बोध्यम् एतत्सिद्धेनेति अत्र सवार्त्तिककारीयसिद्धविचारमुपादाय एवं भाष्यकृताप्यवदत्तमिति भावः
एथगर्थ्य इति अर्थैकत्वपृथक्त्वे भिन्नाभिन्नोपस्थितिविषयत्वं आचष्टे उपस्थापयति राजशब्दोपि पुरुषार्थमेवेति पुरुषार्थालित
मेव स्वार्थमुपस्थापयतीत्यर्थः जहत्स्वार्थायामप्याहार्थवेति अवयवार्थान्वितइति पूर्वपदस्तपावयवार्थसहशार्थान्वितस्वार्थः
तदुक्तमन्यएवेति समुदायार्थः समुदायशक्तिगम्यः क्वचित् अवयवार्थान्वितइति पाठः तदास्य सूत्रे वामरवेत्यस्य विवरणमिदं द्वंद्व
बहुव्रीह्योरेकार्थीभावस्तत्सूत्रोपक्रमे दर्शितः एकार्थत्वमविभागापन्नार्थत्वमएथगुपस्थितिविषयार्थकत्वं तदाह पांसूदक
वदिति यथा मिलितपांसूदके न्यतरविषयकज्ञानविषयत्वेनान्यतरस्य तथा प्रकृतेप्यन्यतमाविषयकोपस्थितिविषयत्वेना
न्यतमस्येत्यर्थः यथायां सूदकमिश्रणेपिंडरूपं द्वयोरंतरमेवैकमापन्नं तयोः तद्वयवत्वव्यवहारश्चतद्वत् अत्रापीति भावः ए
वं चाएथगुपस्थितिविषयत्वमेकार्थीभाव इति फलितं गौणमेकार्थत्वं समासघटकपदानां बोधयितुं द्विंनिर्देशः पदानामसत्वावधा
तत्सत्ताव्यवहारे गौणस्तत्याते षामेकार्थत्वव्यवहारोपीति बोध्यं तदाह यद्यपीति सादृश्यादितिपक्षे प्येनत्स्थले वाक्यमप्येवं स्वरूपमे

के०टी० वत्तयाविरेस्वावयस्यानीयेन शास्त्रनिष्पन्नेन सर्वेंडेन सा दृरूपं गो ध्वं एकार्थीभावरूपेनेन सामर्थ्यं वचनमित्यस्य सामानाधिकरण्य।
७ नुपपन्ने राहकर्मरणातिगहनत्वकादिनिशेषः सामासे वचनद्वंसर्केतनद्विनितंभाष्ये समर्थमित्युच्यते इति वाक्यसमासयो विशिष्टपुरुष
स्येकस्यैवावगते विशेषाभावमाशंक्याह राज्ञ इति अनियतसंबंधप्रयेक्षयेति छेदः उपदत संबंधशब्देन तद्वनितयाप्रतीयमान संब
धः विशेषणाभावमापन्न इति विशेषणत्ववैशिष्ट्येनोपस्थित इत्यर्थः समस्तप्रयोगगत विशेषणत्वस्यापि प्रथमातिरिक्तविभक्त्य
र्थत्वादिति भावः अभिधीयते। शक्त्योपस्थाप्यते। स्वनिष्ठः प्रातिपदिकार्थमात्रनिष्ठः। प्रातिपदिकार्थमात्ररूप इति यावत् नतु
संबंधान्तरापेक्षयोद्भूतसंबंध इत्यर्थः विधीयमानत्वात् विधेयतास्वविषयतावत्त्वात् प्रथमाया विधेयविभक्तित्वात् इति भावः तदे
वाह प्रधानमिति द्वैतो भेदस्य भिन्नोपस्थितिविषयत्वस्य यथा घटघटत्वयोः घटशब्दजन्यसंबंधाविषयकोपस्थितेर्विषयत्वं त
थाद्वैतो राजपुरुषयोरिति भावः संबंधस्याप्रतीयमानत्वाद् राजपुरुष इति समुदायेनैकोपस्थापनादित्यर्थः उक्तार्थानामप्रयोग इति षष्ठ्यानि
वृत्तिरिति भावः उक्तविशेषस्यागम्यमानतयाऽविशेषोक्तिः कथमित्यत आह एवं हीति। पृथगर्थत्वस्यादितिसमासायेक्षपायरस्परापे
क्षयावभिन्नार्थत्वस्यादित्यर्थः न प्रतीयते तिपदाभ्यामिति शेषः सामर्थ्यभेदोपीति व्यपेक्षैकार्थीभावरूप इत्यर्थः भाष्येनापि राम:
क्रम इति नैव क्रम इत्यर्थः वाक्ये पृथगर्थत्वेपीति पृथगुपस्थितिविषयत्वेपीत्यर्थः एकार्थता एकसामर्थ्यवत्ता एकार्थीभावकृतवि ७

शेषप्रश्ने सुवतोयद् इत्यादिकथनमसंगतमतमत आह· एकार्थीभावाभावेति· यथा मशकनिवृत्तिकारणमपि धूमो मशककारणमित्युच्य
ते मशकार्थो धूम इति तथा तदभावकारणकमपि तत्कारणकमित्युच्यते तदुक्तं पातंजलभाष्ये उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्त
यः वियोगान्यत्वधृतयः कारणं नवधा स्मृतं· उभयत्रापि राजसंबंधवस्तुत्वमतीत्यविशेषेऽपि क्वचिदिम इत्यादि· क्वचिन्नेति विभागः क
थमिति तत आह तत्रेति वाक्यीयस्यायेन विशेषणत्वमेव षष्ठ्यर्थो निमित्तं तत्रैव संबंधस्योद्भूतत्वान्न यामानादिति भावः। भेद
निवृत्ताविति· भिन्नो यस्येति विषयत्वमत्र भेदः संबंधस्योपरमादिति प्रातिपदिक इति भावः। भेदनिवृत्ताविति· भिन्नोपस्थितेति वि
षयत्वमत्र भेदः संबंधस्योपरमादिति प्रातिपदिकोक्तत्वात् तत्रांकांक्षोपरमादिमर्थः अर्थस्येति· अर्थगत भिन्नो यस्येति वि
षयत्वस्येत्यर्थः अवृत्तस्येत्यस्य राजसमानाधिकरणत्वेनैकार्थोऽव्यवधायकत्वमिति तिमन्नाने प्रतिरूपमुदाहरणमाह भार्या
राज्ञ इति· भार्यादेवदत्तस्येत्यस्य मध्ये राज्ञः पुरुषस्यानेन व्यवधानमिति बोध्यं· ननु वाक्येपि राज्ञो विशेषणतायां एवं निपातत्वाघ
ट्येषमभिसंबंधस्यानुपपन्नमत आह वाक्ये त्वनिपतेति यो वाप्यपेलक्षणः शब्दगतो भिसंबंधो भाव्याभिमेत इति भावः समासासमा
सकृतः स्वरविशेषो नैकार्थीभावकृतस्त्यत आह अर्थभेद इति स्वरशब्देनोदात्तः स्वरितो वात्र विवक्षित इति बोध्यं· द्वेऽपीति· एजन्तशब्दः कृ नि
नैतः पुरुषः कुमनं तद् इति भावः सिद्धे शब्दार्थसंबंध इत्युक्तेर्गौणिकत्वं कथमत आह वचनेनेति· व्यभिचारमेव दर्शयति यथेति· ननु वाचकाभावे

कै॰टी॰ कथंतत्प्रतीतिरत आह॰ पंचकेति तात्पर्यग्राहकंतु प्रकरणादीति भावः इदमेव दर्शनेस्मिन्नोति नञ्द्वित्रि गोध्यं राजपदमेवेति॰ शद्दशक्तिसा
८ मान्यादिति भावः एतेन विभक्त्यर्थस्य प्रातिपदिकार्थत्वं न इष्टमिति परास्तं॰ शाब्दाभावे ऽर्थसाम्येपि महत्स्वेपि शद्दसाम्याभावे ऽन्यथाभावं द
र्शयति॰ अर्थाभेदेवेति॰ अभिन्नोपस्थितिविषयत्वे चेत्यर्थः॰ वाक्ये वेति चादीनां निपातानां परम्परायोगरूढेति भावः॰ तीक्ष्णेनेति॰ परामे
वम्रावास्त्वैक्यमत्रेत्यर्थः॰ अत एवतवेरतिश्राघमससमासे असमासे स्वरविधायकं विभक्त्यर्थेति॰ वाक्येउपसर्जनबोधकपदा
वां विभक्त्यंतत्वेन तदर्थसंख्याविशेषयुक्तार्थबोधकत्वमित्यर्थः॰ अंतर्भूतेति॰ विशेषणीभूतस्वार्थकमित्यर्थः॰ अभेदैकत्वेति विभ
क्त्यभावेन संख्याविशेषणानतद्रूपेणाप्रतीतिः॰ संख्यात्वेन सर्वसंख्यानामभाने मधुनि सर्वरसानां रसत्वेन भानवदिति भावः॰ तदा
हयर्थोषधीतिस्मच्येवेति॰ अत्र पक्षे संख्यात्वेन सामान्यं भासते न तु विशेषादिति पूर्वस्मात् विशेषः॰ संख्यावद्राजसंबंधीति प
सहृपेपि बोधः॰ अत एव भाष्ये संख्याविशेष इति विशेषपदोपादानं मधुनि सर्वे रससंतोजन्यस्य तत्तद्रोगादिनिवृत्तिरू
पस्य फलस्यानुभवान्नत्संताकस्त्वेनेपि अस्य सर्वसंख्याविशेषकात्स्न्येनाभानाभावइति तद्भावः॰ भेदानां विशेषाणां संरणमान्न्मा॰
संख्यासामान्येन तथाविधः॰ अभेदैकत्वसंख्यापदवाच्यः निर्विशेषसामान्याभावादिदं कथमत आह कायारादिति संख्यात्वे राम:
नैव तत्प्रतीतेर्विशेषरूपाणां जन्यद्रूपेणाप्रतीतेश्च भेदयो ह इतिभावः॰ तदेव समर्थयति कूटहीतेति शुक्लादित्पभेदत्वेति॰ शु ८

ख्यादिरूपविशेषस्यार्थः भेदरूप इति पाठे शुक्लादिविशेषरूपोर्थस्तिमर्थः तत्र रूपत्वेन रूपप्रतीतिः स द्वन्द्वविषया अत्र तु संख्यात्वेन प्रतीति
रसद्वन्द्वविषया विकल्पात्मिकेति विशेषः नन्वेकार्थीभावकृतसंख्याविशेषाभावे नैव तदसंनिधानमिति चेन्नेत्याह लुकेति लुक्शा
स्त्रपर्यालोचनपार्थसत्वमनुमीयत इतिभावः ननु लुक्शास्त्रपर्यालोचनयाऽर्थसत्वमेवेत्यत आह नहीति अनुगम्यते इति बो
ध्यत इत्यर्थः प्रसपलक्षणात् सिद्धय इति शेषः ननु जातौ एकवचने कथं प्रक्रियागतसंख्याविशेषप्रतीत्यापादनमत आह यदिति
ति समस्पि प्रत्ययेन तदनवगते जातौ तदाश्रीयत इति भावः जात्याख्यायामिति सूत्रप्रत्याख्यानादव पवद हत्याव्येण बहुवचनमि
ति अत्रापि व कुपुक्तं अत्राप्यभेदैकत्वमिति अवयविगताभेदैकत्वमित्यर्थः एवं हि दारा इत्यादावप्यवयविन्यभेदैकत्वं स्यादिति
तस्य हानिकृतविशेषत्वभंग इति चिंत्यं संख्याविशेषवल्लिंगविशेषोपि कुतो नोक्त सत्राह लिंगविशेषस्यापीति पुरेतत्संख्या
विशेष इत्यस्याभातिपदिकार्थसंख्याविशेष इत्यर्थस्ते न हि पुत्रादौ न दोषः मासजातादौ शब्दात् संख्याऽप्रतीतिरेव मासत्वे
न तु एकमासस्यैव बोधः अनेकमासजाते द्विमासजात इत्यादिदर्शनात् शब्दशक्तिस्वभावान्न कदापि तेनानेकमासस्य मास
त्वेन बोधः स्वसुत्रोपुष्पस्य पुत्र इत्यादावपि तत्त्वेतनपुत्र इत्येव बोधः आदेशतार्भावो तु तत्त्वेन वस्तुतः एकबोधनं दभावात्
पयोधराणि सारितो वृद्धत्वेनैव कदाचित्रयाणां कदाचिद्वं तु दारादीनां भानेन न कदाचिदपि त्रित्वचतुष्ट्वादिना तथा हतोराज

कै.टी. जत्वादिनैवैकानेकव्यक्तिबोधकत्वेन त्वेकत्वद्वित्वादिनेत्येतत्पर्यन्तमाशयः एवमन्यत्रापि बोध्यं दंतोष्ठस्य दंताः स्निग्धनराज्यमादावेवय
२ व संख्याया अभानानंदंतसेन ओष्ठत्वेन दंतौष्ठत्वस्य गार्थवत्त्वमतीतेस्तत्र वेवश्रनेकव्यक्तिसत्वे पिताताशङ्कृतो भानात्तत्र तत एव भाष्य
कृतोपसर्जनविशेषणत्वरूपविशेषस्य देवदत्तस्य गुरुकुलमित्यादाववव्याप्येकत्वपदस्य भासजातादाव आयकत्वेनोक्तमयमेदेकत्व
संख्याभानमतः इति भाष्येन कापि दृश्यतः इत्याह नास्ति स्वरभेद इति· आमंत्रितस्य वेतिपदात्मरस्य निघातविधानादित्यर्थः न
नु नियमेन संदेहस्येव जननेदृष्टएवं प्रयोगः स्यादत आह तत्र प्रकरणादीति· निपातनाद्वेति केवलाच्च संज्ञायामित्यादाविस
र्थः संख्याविशेषरूपस्य विशेषस्योपस्थितत्वादेवो यो स पि शब्दोऽप्युक्त इत्यत आह अपि शब्द इति यदा त एकार्थमप्रयत्नः पदान्तराच्चो
न्वपि तेनैवोपस्थितेस्स विषयः अर्थान्तरसमायपतीति· विशिष्टोपस्थिताव स्यापि सहायत्वादितिभावः अयोग्यत्वादितिपदा
र्थैकदेशत्वेनायोग्यत्वे भिन्नत्वादिति भिन्नोपस्थितिविषयत्वादित्यर्थः भेदनिबंधनसमुच्चयेति घटपदजे कोपस्थितिवि
षययोर्घटघटत्वयोः समुच्चयाप्रतीतेरितिभावः भेदस्यानिवर्तनादिति दृष्टघटपस्थितिनिवृत्तेरित्यर्थः घोसार्थाभावादिति·
समुच्चयाभावादित्यर्थः पूर्वग्रंथेन संगतिं वदन्नभिप्रायमाह अयं भाव इति यद्यपि वार्थे द्वंद्वसंज्ञक समुदायस्य शक्तावेकार्थी राम:
भावः सिद्धस्तथापि अवयवैः समुदायेन च पृथगुपस्थितानामन्वयद्वयस्यापि संभाव्येन तथा सतिविशेषणाद्यन्वयोपि संभाव्येतेति १

भावः सत्वेकदादेशनस्यभूतत्वादर्जमानप्रयोगोऽसंगत इत्यत आह प्रवृत्तेति प्रवेधोधारा अर्थादेशनपरत्वे संज्ञापरत्वेन स्यादत आह
वाक्येति। सिद्धान्ताभिप्रायमाह यदा त्विति विकल्पेन कर्मसंज्ञेति अतिप्रसंगस्त्वनभिधानादुद्धरणीयः भाष्ये व्याख्याने क्रियत इति समो
समप्रत्ययादिसंज्ञाप्रतीति शेषः च द्रुमसम्बन्धेति। यहरोदर्शनेन वक्त्रपाण्योरिति शेषः तदाह कपोलस्पर्शत्वेनेति निमित्तशब्दोऽयं
कसाधारणादिति भावः वाक्यभेदरूपकारणस्य सत्त्वात् किं पुनः कारणमित्यनुपपन्नमत आह प्रकृतीति। यथा कृतेरीयडिसा दो त
द्व्यर्थमित्युक्त्या अर्थादेशने गौरवमित्युक्तं दोषान्तरमनवस्यामप्याह अनवस्थानेनेत्यादिनात स्य चनावत्केनेक्तं तदिति। यथा
चार्थेऽत्यन्तवस्यापमर्थद्वितिकेन शब्देनोक्तं यत्कारणकचार्थज्ञानेनासौ व्यवहारः क्रियते येन शब्देन च तदुक्तं तत्रापि चाय
मेव यत्पेनुपोग इत्यर्थः अनुषज्यत इति भाष्ये नवस्यावस्यादिति पाठे चेन गौरवमनुषज्यत इत्यर्थः असंभवे हेतुः सामर्थ्यादि
ति। आद्देष्टरिति शेषः गौरवान्नवस्याऽसंभवानापरस्य [illegible] तभावेणाण्थगुपमासो संगत इत्यत आह दोषवाहुल्येति एषका ए
दिति अनेकार्थास्य पिधानवदिति न च न त्र भाष्योक्तेऽपि सपिवोध्यं यथेच्छमिति। गंगादिशब्दानां तीरादावपि प्रयोगादिति भावः न
न्वेवं कोशासंगतिरत आह शक्तिनियमेत्विति शक्तिवोधनेत्यर्थः प्रकृतीनामर्थनिर्देशोनावश्यक इत्याक्षिपतिभाष्ये नवे
तदिति प्रत्ययार्थानिर्दिष्टेति प्रत्ययार्थनिर्देशे प्रकृतीनामर्थस्य संवंधादेव प्रतीतिसंभवेन प्रकृतीनामर्थनिर्देशोनका

कै· टी· र्य इति भावः प्रसंगार्थे निर्दिष्टे प्रकृतस्यार्थस्य निर्देशेन कृतं इत्येतन्न संगतमिति अक्षरार्थः एवं च प्रकृतमर्थं निर्दिशन्नावश्यक इति भावः
१० तदाह कस्यचिदेवेति· भाष्ये पूर्वपक्षी स्वोक्तं साधयति भवति हीति· छेकयोरिमावेवेति शेषः स एव गुणेन गुणिन आक्षेपे दृष्टां
त माह तद्यथेति गुणमात्रेति। सामर्थ्यादेव गुणिप्रतीतो स्वाभाविकी मतुपो निवृत्तिरेव गुणवचनेभ्यो मतुपो लुगिसनेनान्वा
ख्यायत इति भावः इदमपि संबंधिनः पदेनानुपादाने इति बोध्यं गुणशब्दः संबंधिशब्दोपलक्षणमित्याह एवमप्यन्ये दृष्टान्त आप
त्स्य इति पाठं तत्र समाधत्ते विषम इति शुक्लः कृष्णाद इति दृष्टान्तो विषम इत्यर्थः तत्र गुणिमात्राक्षेपस्तथा प्रतीतिश्च अत्र तु नि
यमेन विशेषप्रतीतिर्वैषम्यमिति भावः तदाह यथा शुक्ल इत्यादि द्रव्यमात्रमिति न्सुवर्ध संख्यया आक्षिप्येते सर्थः निर्दि
श्यते तार्थ इत्यस्य तदेति शेषः कश्चित्सोऽभ्यस्तलाठः भवतीवेति विशेषसंप्रसंग परत्यतबंगः तस्मात्तलादो नाम प्रयोगदेश
नमावश्यकं न च तत्संभवतीति स्वाभाविकल्पक्ष एवाश्रयणीयः तदाह तस्मादिति इदं तया· तत्र इजास रूपेण· वि
ज्ञापत एवेति· तत्र सद्वाच्यः कश्चिदर्थ इत्येवंरूपेणोत्पर्यः भाष्ये जर्भरीति पद्यपि जर्भरीत्यस्य भजाएवेति तु र्फरितर
त्य स्पष्टतारा विसर्पणे निरुक्तकारैः शिंतस्तथापि सर्वजनप्रसिद्धत्वाभावात् प्रकृतिप्रत्ययविभागेनान्वाख्यानासंभवाच्च रामः
न विज्ञायत इत्युक्तं भगवताऽन्वाख्याने वाक्यभेदेन विधाने तस्मात् लोके प्रसिद्धनामेव निमित्तत्वेनान्वाख्यानमित्येव पुक्तमि १०

तिभावः। भाष्ये शृंगवेरमाद्यक किं तेन कृतं स्यादिति सनेनैवांप्रयोगानर्हत्वं सूचयति। यदि तु माधुर्यादिति शयादिमतीतिः प्रयोजनं तदा तु प्रयो
क्तव्यमेवेति बोध्यं। अर्थाभिधानस्य स्वाभाविकत्वपक्षे लाघवमपि दर्शयति वा वचनानर्थकं चेत्। वाक्यभेदोऽपि न वा वचनानर्थक्यं
चेत्समर्थः। वा वचनयदेन महाविभाषोच्यते। इदमुपलक्षणं निषेधशास्त्राणां निसंकोचेत्यादि नित्यग्रहणस्य च किमन्य दिति।
न च विशेषणीभूतसामर्थ्येनैव संबंधः। तस्य लोकस्वभावसिद्धत्वेनाविधेयत्वया विशेषणत्वायोगाच्च विकल्पानन्वयादि
तिभावः। न च संज्ञायामित्येकार्थीभावविषये इति विशेषः। तदा हि एकार्थीभाव इति अर्थाभिधानस्य वाच निकल्पपक्षे आ
हभाष्ये। यथेह ज्ञिव… नैयं तीतिरिति एकार्थीभावरूपावृत्तयंति शास्त्रेण निष्पादयतीयेशास्त्रैकगम्यसामर्थ्यमन्यंते
इ समर्थः। अपभावः एकार्थीभावकृतविशेषाः समर्थसूत्रविधेयाः। कृ… वंतेन सहसामर्थ्यं भवति समर्थे च समासस्ये
त्यकमिसर्थः। एवं च विभाषाधिकारादि संबंधं चरितार्थं। समासादौ इति व्यवहारस्य इति इतिमतोरभेदोपचारादुक्तो
ध्यः। किंतेद इति स्वाभाविकत्वमते एकार्थीभावरूपा इति लोकत एव सिद्ध इति न किं चिन्तत्र वक्तव्यं। ये तु शास्त्रनिष्पाद्यां मन्यंते
ते किं तत्स्वरूपं शास्त्रविधानयोग्यमाहुरिति मन्यंते। तदुक्तं यन्न्याचष्टे कार्यं शाब्दिकादिति शब्दानां शास्त्रकार्यत्वात् ते वा लोके सिद्ध
भावात् अर्थसंबंधस्य लोकतो ज्ञानासंभवेन तस्यापि शास्त्रविधेयत्वमेव वाच्यं। एवं चेतद्धि के स्यादिबोधकतया विभाषाय दादि

कै॰टी चरितार्थमेवं च शास्त्रविधेयत्वमेव वाच्यं। एवं च तद्धितसमासादिबोधकतया विभाषापदादिचरितार्थमेवं च शास्त्रैकगम्यत्वात्साम
११ र्थ्यरूपवृत्तेर्लक्षणमपि कार्यमिति भावः। वृत्तिं ह्यनाश्रयसमासादिरूपां तेषां मते वृत्तिव्यवहारप्रयोजकं वृत्तिधर्मं वृत्तिस्वरूपं साम
पि विधेयमेवेति भावः। किं वृत्तेरिति। सामर्थ्यस्येत्यर्थः। नैसर्गिकशक्तिकास्विति कार्यं शब्दमाह नित्यशब्दमाहेत्यर्थेन तदाहेति माशब्दा
दिभ्य इति ठकः शब्दस्य नित्यत्वेन तदर्थसंबंधस्यापि नित्यतया नेममतेऽभयोरपि लोकत एव विकल्पविषयत्वेन सिद्धेर्वैकोपस्थि
तिजनकतावत्समुदायस्यैव वृत्तित्वेन तद्गतैकोपस्थितिजनकतासामर्थ्यं लोकसिद्धमिति न तन्मते प्रश्न इति भावः। परस्य
शब्दस्येति प्रधानार्थकशब्दस्योपसर्जनशब्दस्येवेत्यर्थः। यत्रेति समासादिषु वृत्तिव्यवहारादिति भावः। एवं च तत्ति
द्धशब्दान्तरकल्पनाकल्पनायामभिधायकत्वे तेषां साध्यत्वेन वृत्तिव्यवहारप्रयोजकं सामर्थ्यमिति फलितं। तच्च स्वार्थविशेष
णाकपुत्रस्यार्थोपस्थितौ राजपदशक्तिज्ञानस्य सहकारित्वाद्बोध्यम्। भाष्ये वृत्तिवर्जनेन वादिनाभिसर्थकत्वेऽपदस्य
व्यावर्त्य दर्शयति। नित्यसापेक्षादिपदसमूहपावयवत्वमपि न वास्तवमित्याह। वर्णावदिति। वर्णो ह्रिवाश्राप्यवयवत्रमर इति भावः। तदेवा
ह। नत्वत इति। न त्वेवं तत्पक्षे समर्थः पदविधिरित्याद्यसंगतत्वात्तत्राह। केवलसमास इति वाक्यविषयपदसारूप्यादेव तद्दर्थम रामः
प्यारोप्यान्वाख्यानमिति भावः। केचित्तु नित्यसाऋद्धादेपित्रयलभ्यमानावयवानां नैरर्थक्ये समुदायस्यानित्यपलेऽवमानोभावः ११

नचैतवतानित्यत्वहानिः शास्त्राणि व्याघातत्वरूपनित्यतापास्तथाप्यहानात् । नचैवं भाष्ये यतेषामिति संगतं स्यात् । शास्त्राणि व्याघ
तत्वेऽधा सावयवस्यैव लोकसिद्धत्वेनानादित्वया निरवयवत्वाभावात् । तत्राद्ये जहत्स्वार्थैव वृत्तिः पेतुते षामर्थाभाव एवेति जहत्स्वा
र्थे वेति वाक्यवदेव मतभेदेन नियमात् संदेहाभावेन न तदुक्तिरिति वक्तुं शक्यत्वात् तत्रापि श्रूयमाणस्य सेत्रारोपितमर्थे वत्वादिश
त्वप्रवृत्तिमात्रफलकं । तेन महासंदर्भसादाग्रत्वमित्यस्मदेतत् । शास्त्राणि व्याघातत्वमतेतु स्वार्थासागेऽर्थान्तराभिधाय
कत्वानुपपत्तेः अर्थत्यागेन पुरुषमात्राद्यानयनापत्तेरिति प्राहुः । जहतीति शास्त्रे तेबहुवचनं प्रयोगबहुत्वाभिप्रायेण स्वा
र्थात्तत्वेन प्रसिद्धं जहतीति स्वानि पदानि यस्मिन्निति जहत्स्वः जहत्स्वो र्थोपस्थापकत्वं सम्बन्धसत्त्वेऽपि प्रक्षेपेतिविषयस्याभावेन सर्वधा प्र
तीत्याप्रातिपदिकार्थमात्रवृत्तित्वादित्यभिमानः । स्वेनार्थेन वशीकृतस्येति । स्वार्थमात्रोपस्थाने व्यासक्तस्येत्यर्थः । अर्थो
न्तरोपादानेन अर्थान्तरं प्रति विशेषणत्वेन यत्रार्थान्तरस्य स्वं प्रति विशेष्यत्वेनोपादानं । नचहयगुपस्थितयोः पश्चाद्द्वयः स
म्बन्धबोधक विभक्त्यभावात् अभेदान्वयस्य बाधित एकत्रानुभववाधितत्वादित्यभिमानः । उपात्तस्येति । अर्थोपादानस्येव तत्त्याग
स्याप्येतन्मते वचनं विना शक्यतादिति भावः । परार्थवृत्तित्वादेव । परार्थं प्रति विशेषणत्वेनोपस्थितिविषयत्वादेव । नात्यन्तायेत
त्त्वं । त्यागमात्रमिति । स्वार्थविशेष्यत्वरूपांशस्य त्यागेन तथा व्यवहार इति भावः । विषयतापि शब्दशक्तेति विस्तरेणामंत्र्यमानि

कै॰ टी॰ रूपितं पराप्रेकारायेति परस्य पुरुषादेरितरसंबंधस्य व्यवच्छेदरूपोपकारापेक्षत्यर्थः हि किंकरादीनां राजकर्मानुपकारकत्वादिषमत्र यस्मात् स
१२ न्त्राहतेषामिति आराधयामे एव तत्स्यागादिति भावः भाष्येन चायमर्थः परार्थे विरोधीति एजयदेनपरार्थस्य पुरुषरूपार्थस्यास्य
दनेन तद्विशेषणत्वेन राजरूपार्थोपस्थितौ राजरूपोर्थः स्वतो न विरोधी किंतु स्वगतं विशेष्यत्वमेव विरोधि अतस्तन्नहास्यति
किंतु स्वगतं विशेष्यत्वमेव विरोधि मतं तत्सजातीसेयः तत्र धुनपन्नाह विशेषणानामेति अन्यथा विशेषणाविशिष्टपुरुषोपस्थि
तिर्न स्यादिति भावः अमुमेवार्थं शंकोत्तराभ्यां विशदयति वा कोपीति स्वविशेषणेति इदमुपलक्षणं सख्या विशेषसंबंध
मतीसमतीसोः एवं पुरुषपदमपि इतरान्वितमेव स्वार्थमुपस्थापयति न केवलमतो न भायो पाद्सापन्वयस्तत्र अत्रापे
भावः पदानां तत्तद्विषयता विशिष्टे र्थे शक्तिरत एव बोधे विषयतानियमः एवं च एजयदादेराजत्वनिष्ठप्रकारता निरूपितवि
शेष्यतावच्छिन्नं स्वार्थं तत्र समासे विशेष्यतांशत्यागइति एतावता जहत्स्वार्थत्वमिति अत्र च बीजं समुदायशक्तिरेवं चाव
यवशक्तिसहकृतसमुदायशक्त्या विशिष्टैकोपस्थितिरिति तत्त्वं भाष्ये अथवा चवाद्विशेषणं भविष्यतीति पयायुष्यारागाम
भावेपि गोधान्वयमात्रेण पूर्वतनीं पुष्यसत्तामनुमापमक्षिकापुरुषसादिम्य व हारा ते याष्टतो राजपदस्यार्थाभावेपि वाक्य रामः
दृष्टसार्थकराजशब्दवर्णानुपूर्वीसत्त्वमात्रेणावाकेपथो राजसंबंधवतः पुरुषस्यैवं प्रतीतिस्तद्वद्धापि राजसंबंधवत्पुरुषस्ये १२

वपुरुषपदात्प्रतीतिरित्यर्थः तस्माद्रूपमात्रेणोपात्तस्यैव तत्प्रतीतिसाक्षात्त्वापत्तीति न दोषः विशेषणं विशेषकः इतरस्माद्व्यवर्त्तकम्
र्थः तथा च षष्ठ्या राजशब्दः स्वाभिधेयसंबन्धजन्योपस्थितिविषयार्थनिष्ठं विशेषणं राजसंबन्धरूपं पुरुषपदजोपस्थितिविषयेपु
रुषे आधाय पुरुषं तद्विशिष्टेन पुरुषपदेनोपस्थितिविषयं कृत्वा स्वार्थं तस्य स्वार्थे संबन्धजन्योपस्थितिविषयत्वं जहातीति त
द्वाक्यनिष्पन्नत्वात् नावि मर्थः अयं हि वाक्यात् निष्पन्नं भिन्नमनेन वर्त्तन्ते भिन्नमिति· एवं च राजशब्दाद्राजदर्थप्रतीतिसंभवे पित
तेः शब्दान्वयमात्रेण वाक्ये यादृशाद्विशेषणविशिष्टः पुरुषः शब्दात्प्रतीतस्तादृशस्यैवात्राप्युपस्थितिरिति सनुमानात्पुरु
षपदस्य तथा शक्तिग्रह इति भावः विशेषः पुरुषगतः इति राजपदलक्षणतो वाक्ये पुरुषगतो विशेषोऽभिव्यक्तिः न निवर्त्तते न
त्यर्थः एवं च राज्ञो राजादिपदजोपस्थितिविषयताभावेन जहत्स्वार्थत्वमिति बोध्यं भाष्ये अथवेति· समभिव्याहृतपदार्थ
निरूपितसंसर्गतद्व्यतिरिक्तभेदे तदुभयवान्योऽर्थः स समासेन प्रत्याय्यते· तादृशपुरुषाद्युपस्थितावेव राजादिपदं तात्प
र्यग्राहकं अन्यथादितिपक्षे पुरुषपदे राजसंबन्धवत्पुरुषत्वेनोपस्थापकं इह तु पुरुषपदात्पुरुषत्वेनैव पुरुषविशेषोप
स्थितिरिति भेदः सामर्थ्यमेव न स्यादिति अन्यथा राज्ञः पुरुषोऽश्वश्च राज्ञः पुरुषो भार्यापाश्चेति वत राजपुरुषोऽश्वश्च रा
जपुरुषो भार्यायाश्च स्यात् अत एकार्थीभावरूपसामर्थ्यविकं सामर्थ्यमाश्रयणीयमिदमवश्यं वक्तव्यं· भेदसंसर्गवाने

कै॰टी॰ वार्थो हृत्पाउपस्थाप्यत इति तदाहतदान्मकत्वादिति। एवं च भेदसंसर्गवदर्थप्रतिपादकत्वमेवैकार्थीभावसामर्थ्यमित्यर्थः
२३ तत्र युक्तिस्त्वैव। तत्र भेद इति। स्वत्वसमानाधिकरणो राजभिन्नस्वामिकभेदो राजसंसर्गप्राप्यः एवं हृत्युपस्थाप्यराजसंबं
धवद्व्यक्तिगतराजसंबंधो राजभिन्नस्वामिकभेदव्याप्य इति भावः एवं च भेदवद्व्यक्तिबोधे त्वा राजसंसर्गवत्प्रपीतितद्व्यतीव्यक्ति
रपि दृष्टैव एवमितरत्रापीति नात्र पर्युभोवा योगपद्येनेति अयं भावः उक्तरीत्योभयोः समनियतत्वेन घि निगमनाविरह इति
।एवं च भेदवदर्थप्रमापकत्वं सामर्थ्यं न च संसर्गवतोपि प्रत्ययेन स्व संभवो लक्षणास्येति वाच्यं तत्व्याप्यत्वाज्जहतोपि प्रसवेना
द्रोपात्तलक्षणास्यावधारणागर्भत्वात् संसर्गवदर्थप्रत्यायकत्वं वा सामर्थ्यं भेदस्तु ततः प्रतीतिस्तद्व्याप्यत्वान्नतेनोक्तरीत्या नासं
भवः एतत्क्लेशपरिहारायापरे रोगाभ्यर्गं सामर्थ्यलक्षणामुक्तं सर्वेवाक्यस्यावधारणमिति न्यायबाधश्चेनेति तद्भावः
सर्वं स्वमसक्तमिति भाव्यस्य प्रसक्तं सर्वं स्ववाक्ये प्रयुज्यत इति शेषः पुरुषस्य स्वामिनि नित्यसाकांक्षत्वाभावादाह पदे
ति। तत्र भेदपक्ष इति भेदघटितसामर्थ्ये लक्षणायां सेत्यर्थः स्वाम्यन्तरेभ्यो निवर्त्येति राज्ञः पुरुषो भार्या पाश्वेत्यादाविव भा
र्यादिसंबंधवद्व्यक्त्युपस्थापकत्वान्निवर्त्येत्यर्थः स्वार्थं जहातीति। राजपदं भक्तिविशेषोपस्थितो तात्पर्यग्राहकं भवत्वावाका एमः
प्रसिद्धस्वार्थं त्यजतीत्यर्थः एतावतैव परार्थाभिधायकत्वमिति भावः निवर्तयतीति राजपुरुषो ऽश्वश्चेत्यादौ प्रश्वादिरूपस्वा २३

तरनिरूपितस्वामित्ववद्धर्मानुपस्थापकत्वे राजपदस्य निवर्त्तयतीत्यर्थः इदंहृदं तार्थं यथा विशेषणत्वेनानन्वितोपि पुरुषो रा
जानं स्वान्तरेभ्यो निवर्त्तयति एवं राजा विशेषणत्वेनानन्वितः एव पुरुषं स्वाम्यन्तरेभ्यो निवर्त्तयिष्यतीति भावः भवतु राजार्थस्येति
द्योतकतामात्रेणावारितार्थान्तराजयदानदनुपस्थितिरेव निष्कृतिरित्यर्थः हस्तिरेव न स्यादिति अर्थगताभावेन सुवेतत्वा
भावादिति भावः एवं संसर्गोपीति संसर्गघटितलक्षणापक्षेपीत्यर्थः भेदस्यतनाप्यत्वात् स्वाम्यन्तरेभ्यो निवर्त्यस्यादि गोध्यं
भाव्येनेभ्यः स्वामिभ्यो निवर्त्तयतीत्युक्त्या स्वस्वरूपस्वामिनोननिवर्त्तयतीत्यर्थलाभात् संसर्गो बोधितः एतेः नकाः पुनर्भेदः संस
र्गो वेति प्रश्ने भेदप्रतिपादने पि संसर्गप्रतिपादनात् म ननेत्यपास्तं किंचान्येभ्यः स्वामिभ्यो निवर्त्तयतीत्यनेनान्यस्वामिसंबं
धनिवृत्तं पुरुषं बोधविषयीकरोतीत्यर्थः केन भेदादेः शाब्दबोधाविषयत्वं सूचयति पुरुषो राजानमन्येभ्यः इति दृष्टान्तार्थे इ
तोपि तयोर्बोधाविषयत्वे बोध्येन हि एतत्तद्भेदतत्संसर्गभानकस्याविसंमतमिति दिक् स्वार्थं जहातीति उपसर्ज
नपदमिति शेषः यत्तु भेदसंसर्गौ समासवाच्याविति तन्न भेदप्रकारकबोधाननुभवात् किंच दृष्टान्तिवर्जैन पादे जहत्स्वार्थे
त्वदृष्टत्वेप्युत्स्यादपि तु मेषयंथाः तत्र संसर्गस्य समासवाच्यत्वे तत्प्रतियोगित्वेन पूर्वपदार्थस्यान्वयावश्यकत्वे जहत्स्वार्थत्व रमः
भंग एव स्यात् उक्तरीत्याभाव्यासारस्यारस्यविरोधाच्च तस्माद्भेदादि मतेतत्वमस्यादिवाक्यादावखण्डार्थबोधस्वदृष्टान्तो बोधः अय

कै॰ टी॰ मेव चैकार्थीभावः तन्नपेक्षापदेषु तन्नतत्कार्यमप्रजिवतप्रजियादकेऽश्रासादिमहृत्तिरिति सुधियोऽविभावयंतु। इमौ भेदसंसर्गौ
१५ हं हेपि सम्प्रह विशेषस्यैव प्रतीतेः वृक्षश्रीहावपि संबंधिप्रक्तिविशेषस्यैवमानमिसाभाति राजपुरुषयोरेव व्यवच्छिन्नत्वादुभ
यतोव्यवच्छिन्नमन्यत्रास्तीत्यत आह उभयस्मिन्निति साधुविभक्तिकत्वात्समस्यर्थत्वमिति भावः एवं च शाब्दार्थस्य नियत
त्वात्संचयोनुपपन्न इत्यत आह एवमिति राजनिष्ठविशेष्यतायाः अत्रसागेपि पुरुषनिष्ठविशेष्यतानिरूपितविशेषणतायाः
राजपदार्थतावीकार एव समर्थ इति भावः एवं च स्वार्थमात्रोपस्थितिमानकृतार्थं किंचित्तराश्चितमेव स्वार्थमुपस्थापयतो
स्वत्रपक्षे जहदस्वसोनासंतापेक्षितस्यैव पराशर्थाभिधानमिसस्य परार्थान्वितस्वार्थाभिधानमित्यर्थः मध्यमयोक्त
परार्थतासंयत्राह कत्वमिति निष्कर्षः इतरत्राशयानभित्तं प्रकृतेभाष्येन तु चेति कस्मात्सपि भवतु हेअपिवापर्यायेणमवे
तां किं प्रश्नेनेत्यत आह एकपेत्ति गुणप्रधानभूतस्येति परस्परमिसादिः न तु प्रयमायां को हेतुरत आह प्रधानेत्ति संवेध्यंत
रपेक्षपेतिन तु राजनिपुरुषापेक्ष इति भावः नक्कचिदंनभावमितिन राजसखइत्यादौ वृक्षश्रीस्वर्थ इवकाचेकशाद्वे विनानियमेन
प्रतीतिविषयोनापितिउंते कत्वेवत्प्रकृत्यर्थे गुणभूत इत्यर्थः गुणभावादेतम्भूत इति धात्वर्थत्वात्तत्रांतर्भूत इत्यर्थः अत्र रामः
मिहिमांतर्भूत इति प्रथमामातोनीस्तु क्कावत्रापि प्रथमापत्तिभ्रमः स्यादतः प्रातिपदिकार्थ इत्युक्तमिति भावः अतिरेकामा १५

वादितिषष्ठ्यभावे हेतुरुक्तः। एवमुपस्थितिर्निर्वचनसांसर्गिकविषयताया अभावादित्यर्थः। एवं राजपुरुषः इत्यादिषष्ठौ स्वस्वामि
भावादेर्घटः इत्यादौ घटघटत्वयोः समवायस्येव महत्त्वस्युपस्थितत्वेन प्रकारतेव विभक्त्यर्थस्यैव च समासे संसर्गतया भानमिति
बोध्यं। संघातस्यैकार्थत्वे पिधवदस्तदिताऽऽदिसंघातवत्त्वद्विवचनं स्यादत आह नहि इति। अवयवार्थोपस्थितन इति। शास्त्रकृत्तश
क्त्योपस्थितार्थस्यागे तदेवाधायाति रिक्तशक्तिकल्पने च मानाभावादिति भावः। तत्र यद्यपि अवयवार्थस्तत्तद्विशेष्यता
वच्छिन्न एव तथापि विशेषणत्वेन तस्याविशेष्यतया आच्छादनात् स्यापि विशेषणत्वेनैव प्रतीतिर्न तु स्वरूपेणेति न
विशेषणाघन्वयः इति तात्पर्यं। वाक्ये तु प्रत्येकपदजबोधकाले राजादिगतविशेष्यतायाः स्वरूपेणैव भानमिति विशेष
णाघन्वयो भवत्येवेति बोध्यं विशिष्टार्थ इति विशिष्टस्योपस्थितिविषयत्वादित्यर्थः। रथमजहत्स्वार्थो हस्तिव चेनवा
दिनस्क पदार्थस्तदर्थस्तदंगीकारस्तदुक्तमेव अत्र क्षौहिणी रथंतरादिपदे तु जहत्स्वार्थैवेति बोध्यम्। एकार्थीभावस्यापि अपे
क्षापूर्वकत्वात् कथमस्य पक्षान्तरत्वमत आह अपेक्षैवेति एकार्थीभाववादिनोपि राजपुरुषपदयोः परस्परं विना बोधा
जनकत्वमत्राकांक्षासत्वे एवं तत्त्वात्संबंधांशे विशिष्टशक्तिकल्पनं व्यपेक्षावादिनस्तु अत्राकांक्षावशादेव तद्भानं न तु वि
शिष्टोपस्थापकशक्तिकल्पनेति भावः। ननु शब्दयोरेव तन्नत्वात् त्वतो व्यपेक्षाभावः। एवमर्थस्यापि अर्थे आरोपेणासेति चेत् शब्दे

ध्यारोपः स्यादत आह स्वं रूपमिति शब्दार्थः क इत्येव शब्दविषयाकांक्षा प्रमातुर्न त्वन्यपि शब्दान्तरविषया. अर्थज्ञाने तु कोस्यान्यपदार्थ इत्याकां
प्रमातुरितिभावः ननु अन्यपदार्थान्तरजिज्ञासाकांक्षा सा च प्रमातृगता नार्थगते सत आह प्रमातृगतामिति तस्याश्च तद्रूपस्या
पितार्थ एवारोपो नु न गुणाभूते शब्द इतिभावः अर्थबोधोत्तरमेवास्यान्यपदार्थः क इति जिज्ञासोदयान्नत्वन्यषष्ठ्युपात्तार्थे तदध्यारोपः
अयमर्थः अर्थान्तरमाकांक्षत इति व्यवहारात् अयरूपकआकांक्षाविषयत्वात्साकांक्ष इति बोध्यं दानादीति. दानं वेतनादेः स्वाम्यमि
त्यस्य पुरुषे इति शेषः भाष्ये षष्ठी वाचिकेति. समासे त्वाकांक्षादेर्यतो बोधः वाक्ये तु साकांक्षाया एवात्र सत्वाद्धि रूढ विभक्तिरे
हि सेपि भेदसंबंधबोध इतिभावः विशेषणविशेष्यभावो वाशेवाक्यम्यायेन समासस्यापि शक्तिर्न तु स्याद्विशिष्टोपस्थिति नियामि
केति बोध्यं अत्राकास्यापि राजार्थपुरुषार्थयोः संबंधे इदं शक्तमिति शक्तिग्रहात्तन विशिष्टोपस्थितिरत्वन्यत्रेप्यमपिट्ट
त्तिवर्त्तेन बाधेकदेशिन एव पक्षः न तु निलशब्दवादिन इति बोध्यं वाक्ये त्वाकांक्षितस्यास्य विभक्तिशब्दवाच्यत्वं. नच संबंधसंबं
धसंबंधो वाक्येप्याकांक्षालभ्यो न वस्या यन्नेरिति दिक् भाष्ये क्रियाकारकयोरभिसंबंधस्येति शक्तिः संबंधश्चोभयमपि विभ
क्तिशक्यं घटमित्येतन्मात्रादपि घटकर्मिकेति बोधात्संबंधस्य वाक्यार्थत्वासंभवात्. अत एव घटमित्युक्ते क्रियाविशेषाकां राम:
क्षेतिभावः शक्तिरेवाभिसंबंध इति इदं चिंत्यं षष्ठ्यामिवात्रापि संबंधबोधकताया एवमाख्याभिप्रेतत्वस्य तदक्षररवारस्येन लाभात् १५

लक्षणायां मानाभावाच्च । भाष्यान्तरस्येतद्विरुद्धस्यानुपलम्भाच्च । अथ येवेतीसपि न कारकशब्देन शक्तेत्युक्तौ क्रियाकारकशब्दयोरभिसंबंधसे
त्यर्थेलाभेपि भाष्यतः शक्तेर्वोच्यत्वालाभात् । नापि शक्तिसंबंधस्य द्वितीयावाच्यकेतिय त्किंचिदेतत् तं भाष्ये ऽयपद्येवेति ननु एवं पर
र्यायाभिधानमपि सामर्थ्यमुक्तमेदं संसर्गादिवत्तत्कथमधुना एकार्थीभावमये सयोरेवोहे रवद्रति । तथापि प्रसिद्धत्वादेवमुक्तं क्रिं
क्रियाविशेषं क्रि+ वेत्न । तेषामेकार्थीभावपदार्थत्वादिति तासयांता संवोपसर्ग इति यद्यप्यनुपसर्गा अपि प्रादयः सन्ति+ उया
गते विशेषयेन समदतिपदर्थेन समोऽर्थस्य सामर्थ्यमित्यर्थः तस्मात्तदर्थात भावोत्रानुमीयत इति भावः । एवमेव शाकपार्थि
वादौ गतिः ननु प्रक्रान्तायेहयावगमकत्वे दृष्टेऽर्थं च तु रूपकथनमनुपयोगी मत आह तुल्यार्थेति । ननु गमिस्तुम्योरिव दृक्ष
ति वध्योर्मोक्तत्वार्थत्वं न हृष्टमत आह पर्यायेति । पूर्वत्र तुल्यार्थधातुनिर्देशद्वारा पर्यायत्वं इह तु धात्वोरुक्तस्यार्थस्याभावेपि स
मुदाययोः पर्यायत्वमित्यर्थः पर्यायोपादानं च तदर्थवाच्यपरस्परसंसृष्टार्थोपस्थितिरेव न हाय गुपस्थितिरित्येकार्थीभावपक्ष
र्थः । स्पष्टमेवानेनोक्तः स्यति षंगो त्रनन मेस्य तिहारष्स्याहरज्वादीति भाष्ये अहानाविति । अहानिः परस्परं विना शाब्दबोधाजनकत्वमेवे
ति बोध्यं । अन्तरेणार्का क्षावशादिति । तासर्वं यथा च वत्सयोस्तयोरन्यः संबंधस्तथाऽनयोर्विशेषणसंबंधो विशेषणसजातीयविशे
षणसंबंधश्चेति सूचितं ननु संबद्धा विमाविसत्रैकोपस्थितिविषयत्वमेव संपद्धत्वं न चैवं प्रकृते भिन्नोपस्थितिविषयत्वे हिस्य

कै·टी· येस्यात्तत्र तुहानिरस्त्येवेमत आह अथवाभवतिचैवमिति· तथाचषष्ठे सम्प्रसारयिहाना विति भिन्नोपस्थितिविषयत्वेऽस्यार्थः एवमुभयोः
१६ सत्रास्वत्वंकृताप्यये स्यापसंदूषयति· भाष्येप्ययमर्थस्तस्मिन्निति· संख्याविशेषेति· अशुवरइत्यादौ। वचनेनेति सविशेषणानां हे
त्रिनैत्यादिनाऽननुविभाषाधिकारादाचार्यस्यायमेव पक्षोऽभिमतो लक्ष्यतेत आह तदेवमिति· क्तान्तादिलोपाविधाने निसता
श्रयेणां विभाषाधिकारश्च कार्यशब्दाशंयेणा तस्य क्षेर्थस्यापि शास्त्रैकगम्यत्वेनैकार्थीभावस्य वैकल्पिकत्वबोधयितुं सू
त्रमावश्यकमिति भावः कार्यपक्षेनुवहवोवा तथि मी इति वाक्यमाह त्रि निष्पद्यते इति वा दिनां वाक्यस्यापमाण क्तान्तादीनां
शास्त्रविनालोपासमवेवीप्सादिबोधासंभवश्चेतिभाकं निसदर्शनेस्विति· एकार्थीभाववादिनाऽर्थानां स्वाभाविकत्वपक्ष
स्यैव प्रागुपपादनान्निसदर्शनशब्देनैकार्थीभावदर्शनमवोच्यते इत्याहुः वस्तुतस्तु निरादिपूर्वपदानां क्तान्ताद्यर्थेह
त्तितया एषामर्थानामेकार्थीभावकृतविशेषत्वमत एव तत्कृतविशेषणभाष्येनेतेषामुक्तिः निराद्यपः क्तान्ताद्यर्थेइत्या
दीनां क्तान्ताद्यर्थवर्तमानानि रादयइत्यर्थः एवं चोक्तार्थानामितिन्यायेन तेषामप्रयुक्तार्थबोधकपदवदप्रयोगः सिद्धः अत
एव संख्यापाव्ययेतिसूत्रे समासेनाभिहितत्वात्सुजर्थस्य सुचोऽभाव इति भाष्ये उक्तं। सुजर्थश्च जन्मेति तत्रैव व्यक्तेः किं रामः
चैकार्थीभावेनामेकोपस्थितिस्तत्कृतत्वेनक्तान्तादिलोपस्य· संख्याविशेषप्रतीतौ हि पृथगुपस्थापकपदज्ञानेकारणमिति १६

तत्प्रतीत्यभावस्तत्कृतो भवत्येव । अन्यथा घटः घटपटावित्यादौ घटत्वादेरपि संख्यावत्त्वेनोपस्थित्यापत्तिः एवं द्वंद्वे चकारप्रयो
गोप्येतत्कृत एव । न च समासेन चार्थस्याभिहितत्वान्न तदप्रयोगः समासेन सत्वभूतस्य विशेष्यतयाऽभिधानेपि असत्वभूत
स्य विशेषणतया बोधार्थं चप्रयोगस्य दुर्वारत्वात् पृथगुपस्थितयोरेव समुच्चयस्य च बोध्यत्वेन तदप्रयोग इति तस्यापि
तत्कृतत्वं । लोकेपि पृथक्ज्ञातयोरेवैकदेशत्वे समाहारादिव्यवहार एव । न चार्थे द्वंद्व इति सूत्रस्य च्चार्थत्वारोपे शाने पमितिदिक् ननु
षपेक्षावादे एकार्थीभावकृतविशेषस्यावक्तव्यत्ववदेकार्थीभाववादेपि निघातयुष्मदाद्यादेशोदाहरणविषये एकार्थीभावाभा
वेन समर्थपरिभाषानुपस्थितौ तिङ्ङतिङ इति देवदत्तो गच्छति इत्यादौ भिन्नवाक्ये च निघातादिप्रतिषेधो वक्तव्यः स्यात् । व्यपेक्षावादे तु न
दोषः तत्रापि समर्थपरिभाषोपस्थितौ भिन्नवाक्ये सामर्थ्याभावात् एवं राज्ञो गोश्चाश्वश्च पुरुषाभ्यामेकार्थीभावस्य वक्तुमशक्य
त्वात् पुनरुपत्य षष्ठीतत्पुरुषद्वंद्वौ प्राप्नुतः तथा च स्वरद्वयं स्यादिति तत्प्रतिषेधो वाच्यः व्यपेक्षावादे तु न एताभ्यामेव व्यपेक्षा
न गवेति वक्तुं शक्यत्वात् इति पूर्वपक्षे व्यपेक्षावादे योदंत्व वशंवदा व्यमित्याह भाष्ये तत्र नानाकारकादिति । तत्र पक्षद्वयेपि । इदमेवा
भिप्रेत्याचष्टे सर्वथा दोषा नानुदाहरतीति । सर्वथा पक्षद्वयेपीत्यर्थः भाष्ये तत्र चेति । पाठे तत्रैकार्थीभावे नाव्यपेक्षायां तत्रैव त
स्मिन्व्यपेक्षायामिति । तत्र । कार्थीभावे । एतस्मिन्व्यपेक्षासामर्थ्ये चेत्यर्थः इह रमेर्नानाप्रकारानेककारकात्स्वरत्वाभावादाह नाना

के. ति. शब्द इति। एव्यभावेति एवं क्रियावचन इत्यर्थः भावशब्दः क्रियापरस्तदाह भिन्नायाः क्रियाया इति निघातप्राप्तिविषयभिन्नाया इ
१७ त्यर्थः अपदेऽइत्यत्र निघातविषयाहरण क्रियातो भिन्नास्ति क्रियातत्कारकं दृइः अत्र पक्षे ओदनं पचेत्यादेरनुदाहरण
त्वमाशंक्याह न तथानानेति अमतयुष्मद् इत्यस्य भिन्नं कारकं यस्य पचेत्यादेरित्यर्थः प्रतिषेधवचनारंभे तत्रादेशाभावमुपपादयति
अत्र पचेरिति। किं चिलितेति। युष्मदस्मत्साध्यभवनक्रियाभिन्नपच्यादिक्रियाकारकत्वादोदनादिना नाकारकमिति भावः।
ननु हरतेः कर्मणामात्रायेक्षत्वेन न देऽन व्यपेक्षेत्यत्राह अनेनेति पदेनेति अत एवास्मिन्सर्पिर्ब्भिवाने न पचपरस्यादोषत्वं पवोद
नमित्यत्र संबंधमात्रात्मकर्थव्यपेक्षेत्यत आह भाविन इति। ओदनं पचेति पाठेपि ओदनद्वारिका पचिनापि व्यपेक्षेति वोध्यं अर्थयो
राकांक्षैव व्यपेक्षेति नास्यं एकस्त्रदेशसंयोगोप्यर्थ इति भावः। भाष्ये प्रचयेचेति व्यपेक्षावादेपि समुदायेन व्यपेक्षायां
अवयवातिरिक्तसमुदायस्यावयवानालिंगितस्य निरूपयितुमशक्यत्वेनावयवैरपि व्यपेक्षास्त्येवेति तन्मतेप्ययं दोषस्तदव
स्थ इति भावः ननु प्रचयशब्दस्य समाहारपर्यायत्वेन समाहारे समासनिषेधेपि इतरेतरयोगे सद्भावोस्त्वित आह अनेकस्मिन्निति प्र
चयप्राधिक्यमिति भावः ननु युगपदेकस्यानेकसंबंधानुपपत्तेः कथं युगपत्समासद्वयप्रसंग इत्यत आह तत्रेति। गोराज्ञायीति समुदायमः
पव्यपेक्षाया अवयवव्यपेक्षायाः समुदायैकार्थीभावेऽवयवैकार्थीभावस्य च दुर्निवारत्वादिति भावः अश्वादिभिश्च साहित्यसत्वा १७

देवमहत्तिबोध्यम्· पूर्वं वा तत्पुरुष इति· प्रथमातिक्रमे कारणाभावादिति भावः ननु परत्वात् द्वंद्व एव भविष्यतीति न दोषो त आह विप्रति
षेधेति· आकडारीयत्वेप्य विरोधमुपपादयति· भिन्नसमुदायेति· टजिति· तथा च स्त्रीत्वे ङीप्स्यात् किंच द्वंद्वो न रतत्पुरुषे बङो वै
कल्पिकत्वेन राजगोध्वपुरुषाद्रूपसमीपेपपनेनत्त स्यादिति भावः समर्थतरगामिति भाष्ये नैकार्थीभावपरे तत्र तरतमायोगादत
आह शक्तेति समर्थतरत्वे आश्रुततरत्वं हेतुस्तत्वमतेरंगत्वादिति स्पष्टत्वादयति प्रथमेत्यादिना आश्रुततरयेपदत्ति वहुव्रीहिः एवं
चाश्रुतरं कार्यप्राप्तिमत्वमेव शक्ततरत्वं बोध्यं तुल्येति तुल्यजातीयेः प्रथमप्रवृत्तिरिति एकार्थीभावस्य व्यपेक्षापावाकस्य ना सर्वं द्वंद्वे
ततः षष्ठीतत्पुरुषः स्यादर्थः भावप्रवेनेति प्रत्येकमवयवैरनुमीयमानस्य सामर्थ्यस्य सत्वेपि साक्षान्नेत्यर्थः एवं च तस्य समुदा
येन सामर्थ्यान्न पूर्वं तत्समुदायप्रयुक्तो द्वंद्व इति भावः ननु द्वंद्वे समुदायेनैव न दवयव गोशब्देनापि राजपदार्थस्य सामर्थ्यसत्वा
त्तत्समुदायस्यापि षष्ठीतत्पुरुषसंज्ञा स्यादिति टच्प्रसंग इति चेन्न· नावयवेनेत्यस्याश्वपुरुषसापेक्षेणोति शेषे राज्ञो बात् तद्देव
स्फुटं व्याख्यानांतरव्याजेनाह अपरस्त्वाहेति राज्ञः समुदायेनैव सामर्थ्यान्तरयोर्वैयर्थ्यमाशंक्याह समुदायेति द्वंद्वस्यार्थे
स्येति· विशेषणसापेक्षत्वेद्रूपविशेष्यांतरसापेक्षत्वमप्यसामर्थ्यप्रयोजकं एवं च टंपक्ष द्वयेप्यनावश्यकमिति भावः
भाष्ये प्रधानमत्रेति अत्र वयवसंख्यापातत्र समूहस्य संख्यावत्वाश्रयणात्तस्य प्राधान्यमिति भावः वा कमलस्य गकरणस्यासं

के॰टी॰ गतिमाशंक्याह॰ नानेति॰ कचिदितिनघास्तिष्ठतिकेरस्यादेः॰ अत्रत्वसामर्थ्यान्नमाप्नोतिपथाकथंचित्सामर्थ्यग्रहणेनत्वर्थ
१८ दृष्टोहणेनेनेसादावपिस्यादितिभावः लौकिकेतिसुप्तिङंतचयोवाक्यमित्यादिलक्षणविधानेतिनिक्रियपवाक्याभावस्यलोक
व्युत्पत्तिसिद्धत्वादितिभावः अव्ययग्रहणंचेयथ्यमाशंक्येतायद्यप्यव्ययमिति। खर्गछन्तीत्यादौकारकं उच्चैः यदुतीसत्रवि
शेषणंक्रियाविशेषणत्वादत्रापिकर्मतेगासविशेषणमिसेवक्रियाविशेषणेपिसिध्यतीत्यतआह। अव्ययमिति। य
द्यपिकारकत्वादप्यस्यसिध्यतितथाप्यव्ययग्रहणावदितिप्रपिमपंचार्थमितितत्वमितिबोध्यं क्रियाप्रधानत्वमितिलक्ष
णावच्छेदकप्रदर्शनमिदंदेवदत्तोगतइत्यादौत्वतीमध्याहार्यमितिभावः नन्वेकग्रहणासुनरप्यनुपपत्तिस्तदवस्थैवे
त्यतआह एकशब्दइति एकस्यपदस्यवाक्यसंज्ञायांप्रयोजनाभावादाह बहुव्रीहिरिति एकंतिङंतंयत्रसमुदायेइत्यर्थः
परेत्यास्त्वातंसविशेषणवाक्यमितिलक्षणंतिङतिङइतिसूत्रेऽतिङ्ग्रहणंकुर्वतःसूत्रकारस्याभिमतंलौकिकमेव
पचतिभवतीत्येतत्साधारणंतत्रसविशेषणत्वेनविभागेसाकांक्षत्वंलब्धं तत्रारख्यातपदेप्रक्रियाप्रधानंलक्ष्यतेतेनत्वयाश
पितव्यमित्यादेः संग्रहः सविशेषणमित्यस्यसाक्षात्परंपरयावायद्विशेषणंतत्सहितमित्यर्थः तेननघास्तिष्ठतिकुलेइत्या रामः
दौनघाइत्यादेः समानवाक्यत्वसिद्धिः एतदेवाभिप्रेत्यामरकोशकारकान्वितक्रियावाचकंसुवंतचयतिङंतचपसुप्ति १८

ङ॰ तचयागस्तन्महावाक्यमित्युक्तं सुगिरिङ॰ तच योवाक्यं क्रियाकारकाचितैत्सनेनतत्रवाशब्दश्चेदर्थकारकं चतिङं. नवाच्येतदतिरिक्त
पदवाच्यंवैस्यस्यत। एकस्यतत्त्ववारणाय सुवंतचयेसादि॰ एतत्समानार्थकमेवाख्यातमित्यादीति स्पष्टमेव। एतदेवैको
द्देश्यकेकविधेयकत्वगर्भमेकवाक्यत्वलक्षणं बोध्यं। तदुक्तं हरिणा साकांक्षावयवं भेदे परानाकांक्षशब्दकं क्रियाप्रधाने
गुणवदेकार्थं वाक्यमुच्यत इति। वाक्यमित्यस्यैकवाक्यमित्यर्थः अर्थैक्यादेकं वाक्यं साकांक्षं चेद्विभागे स्यादिति जैमिनिसूत्रा
तत्र तत एवोद्देश्यानेकत्वे विधेयानेकत्वे च वाक्यभेद इति मीमांसकोदोषं प्रतुकेपटेनास्य याभिभाषिकत्वमुक्तं तत्समासान
पदघ्याख्यातमित्यत्रैकत्वविवक्षाकृत्वायचतिभवतीत्यत्रवाक्यत्ववारणं तेन कृतेन तदपि न आख्यातत्वपर्यास्यधिकर
णमिकमेवेति प्रागुक्तं भाष्यरीत्यैकत्वविवक्षायाः फलाभावात् किंच प्रक्रियस्येन आख्याताहम्यादिसादावैकंचास्तरणमहत्या
कृतीस्यादिति भाष्योक्तमायेनात्रैकत्वविवक्षायामेकस्यैवाख्यातस्य वाक्यत्वं वोधितस्योन्याख्यातान्तरस्येति दोषात्॰
किंचानपेक्षकत्वविवक्षया समकक्षाख्यातद्वित्वेपवतिकरोतिचेत्यादौ तदाकारणोपि विशेषणमादाय तत्र द्वित्वेवारणमश
क्यसविशेषणोआख्याते एकत्वसत्वात् अनेन च संहिन्हीत्यस्यासंग्रहः विशेषणानुपादानेन सविशेषणत्वाभावात्
। वाक्यत्वफलं तु मपाकिंचिद्वक्ष्यमिति प्रश्नोत्तरेचानेनस्यापि प्रश्नाख्यानोपनेन वाक्यस्पटेः श्रुतसिद्धिरतः स्वशास्त्रपरिभा

कै॰टी षितेलक्षणमाहे कतिङिति पञ्चकेष्टेन ब्रह्मिब्रह्मीति भाष्योदाहरणं देवदत्तेतिशेषपूरणेन व्याख्यातानन्तपर्वेलक्षणेनैवमिदेः ङ्किःप्र
१९ योगस्य भाष्ये व्यर्थतापत्तेश्चा एतेनपर्वलक्षणे एकत्वाविवक्षाशंकावारणेनैकत्वविवक्षाबोधनार्थमिदं लक्षणान्तरमुक्तमि
त्यपृष्टमेकेपरोक्तमयास्तेपघप्ययेःश्रेरमादौ एवंरूपायप्रिबेवांतरपदत्वमप्यस्ति एवंचब्रह्मिब्रह्मीत्यत्रकथमेकतिङ्त्वं तथा
प्येकानुपूर्वीकतिङन्तसमुदायोगाक्यमित्यर्थः वद्धकी हि समासानेतेनपचतीत्येतन्मात्रस्यनगाकत्व एतल्लक्षणानुसारेणो वा तिङ्॰
इति प्रत्याख्यातमिममन्त्रत एवताएकतिङ्वाक्यमित्यत्र चशब्दो वाशब्दो वानोक्तः भिन्नविषयत्वात् एकविषयत्वे हि सो
वश्यंपवक्तव्यः स्यात् इष्यते हि भगवतस्तथाशेलीतस्मादाद्यलक्षणं वाक्यस्य दृष्टेरिसेतन्च्छात्रलोकसाधारणत्वात् अत एव
पचपश्यपचहेवदन्तेसांदोषुन्नोभवसेवएकतिङ्मेतन्मात्रोक्तोनत्वापीदमेवेतिभ्रमःस्यात्तदसमानवाक्ये इत्येतद्विषयेकवि
तत्सुतविषयं चैकतिङिति अत एव ब्रह्मिब्रह्मीत्युदाहरणसंगतिरत एव तिङ्ङतिङः इति सूत्रे भाष्ये समानवाक्याधिकारादनि
घ्नहरणानर्थक्यमितिवार्त्तिकव्याख्यावसरेन च समानवाक्ये इति तिङन्तेऽस्तु इति उक्तेनैवैकतिङिति वह्मीहि रिति च सूचितं
सप्रश्नापमर्थो ये त्र भाष्येपीसन्नुपदमेवस्फुटीभविष्यतीत्याहुः समानवाक्ये इति । समानशब्द एकपर्यायः एवंविधलक्षणलक्षिते ए राम:
कवाक्ये इत्यर्थः चादिभिर्योगे इति नचवाहेति सूत्रे समानवाक्ये इत्यस्य संबन्धोनेत्यर्थ इति कश्चित्तन्नयथामासस्यवादिभिरिति १९

नरभाष्यासंगतेः किं च तत्वमते भिन्नवाक्येपि निषेधप्रवृत्तिरस्य फलं बाध्येन त्वादेशभावस्यभावेन निषेधस्यैवं वैयर्थ्यान्न· तस्माद्युष्मदाधा
देशप्रतिषेधइत्येवार्थः किमर्थमिदमिति इदं प्रतिषेधवचनमाख्याते साम्यपेक्ष्यादिवाक्यलक्षणं च किमर्थमिति प्रश्नः अत्र
एवोत्तरं यत्रैवाक्यसंज्ञेत्युक्तिः संगच्छते वाक्यसंज्ञेतिरेकतिङिसेषा तद्बाध्यमिति । इदमसमर्थं अप्राव पूर्वविधायकमिव
वादियोगेपि तदपवादत्वात् पूर्वविधायकेनलधिकार इति भ्राम्यैत्तत्प्रमनिवारणाय इदमन्वाख्यातमित्यर्थः न च वाहे
त्वारंभसामर्थ्यान्नैवमित्यन्वाख्यानतात्पर्यं एवमेकतिङि तिवाक्यलक्षणस्यैवाकौशास्त्रे सर्वत्र वाक्यस्पष्टे । सादावपी
दमेव वाक्यलक्षणमिति भ्रामेत्यत्रैः प्रति इदमपि वाक्यलक्षणं शास्त्रे आश्रीयत इत्यन्वाख्यानात् आद्येलक्षणं समानवाक्ये
इत्यत्रेकतिङिसेवउदाहरणेन वाम्नाव्यस्या अपरांसूचितम्· चादिभियोगेइत्याद्यमुपलक्षणं एतद्वेदमयापूर्वक्रि
यते वाक्यसंज्ञा समानवाक्याधिकारश्चतद्बाध्यमित्यनेनसूचितं इदं यद्युपेक्षिपते तद्धेष्यमिमर्थस्य स्वरसतः प्रतीतेरि
त्यलं विकल्पतइत्यस्य व्याख्यातीत्यर्थः एवं च समानवाक्ये इत्यधिकारस्य एकतिङिसेव वात्र वाक्यपदार्थः आद्यल
क्षणेनापदंडेहराने नैतस्यापि वाक्यत्वात्तत्र निघातापत्तिः अपदंडे इतीतस्यापि अनेनैतदर्थपरिच्छेदवाराह इति
क्रियाविशेषणत्वात् पचौदनं तत्र च भवति प्रतिमत्र हेतुहेतुमद्भावेनान्वयात् भवनक्रियां प्रति तस्य विशेषणत्वाद्वाक्यत्वेमि

कै॰ टी॰ तिभावः।प्राचावश्यमितिवाक्यसेनाकलमपंदंडोहणनेनेत्युक्तंसमानवाक्याधिकारफलमहभाष्येसमर्थेनिघातेहीतिनिघातेस्फ
२० त्कापटवेतरस्मुदाहरणमनुपपन्नमतआहउपलक्षणमिति॰ कार्येनस्यादिति॰ तिष्ठतिलेवन्तरस्यादौनिघातोनस्यात्शाली
